**CLASS – IX (R3 पाठ्यसामग्री)**

**सत्र 2026-27**

**1. <u>भावार्थसहितं दशश्लोकाः</u>**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।1।।

भावार्थः - पृथिव्यां त्रीणि रत्नानि सन्ति। तानि रत्नानि जलम् अन्नं सुभाषितं च भवन्ति। किन्तु मूर्खजनाः तु पाषाणखण्डान् रत्नानि इति वदन्ति ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।2।।

भावार्थः- एषः स्वजनः अस्ति, एषः च परः जनः अस्ति इति एतादृशं चिन्तनं तु सङ्कुचितभावयुक्तानां जनानां भवति। येषाम् उदारस्वभावः अस्ति तेषां कृते तु सम्पूर्णा पृथ्वी एव परिवारः भवति। सर्वे जनाः मम परिवारस्य सदस्याः सन्ति इति ते चिन्तयन्ति।

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।3।।

भावार्थः - वयं यानि कार्याणि कुर्मः तानि केवलम् इच्छया न सिद्ध्यन्ति । कार्यस्य सिद्ध्यर्थं परिश्रमः तु आवश्यकः एव। सिंहः यद्यपि शक्तिमान् भवति तथापि आहारस्य कृते सः अपि परिश्रमं करोति। सुप्तस्य सिंहस्य मुखे मृगाः स्वयम् एव न प्रविशन्ति ।

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥4।।

भावार्थः - अस्मिन संसारे सर्वाणि वस्तूनि सर्वत्र सुलभानि न भवन्ति। यथा प्रत्येकस्मिन् पर्वते बहुमूल्यानि रत्नानि (माणिक्यानि) न प्राप्यन्ते, प्रत्येकस्य गजस्य (हस्तिनः) मस्तके दिव्यं मौक्तिकं (गजमुक्ता) न भवति, तथा च प्रत्येकस्मिन् वने सुगन्धितः चन्दनवृक्षः न उत्पद्यते। तथैव, अस्मिन् जगति सामान्याः मनुष्याः तु सर्वत्र मिलन्ति, किन्तु परोपकारिणः, ज्ञानिनः, सत्पुरुषाः (साधवः) च सर्वत्र सुलभाः न भवन्ति। ते अतिदुर्लभाः सन्ति।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ।।5॥

भावार्थः - यः जनः सर्वदा वृद्धानां ज्येष्ठानां च सेवां सम्मानं च करोति, तथा च यः तान् सविनयं प्रणमति, तस्य जनस्य आयुः विद्या यशः बलं च वर्धन्ते।

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ।।6।।

भावार्थः - विद्या विनयं ददाति, विनयकारणेन जनः योग्यतां प्राप्नोति, योग्यः जनः सरलतया धनम् अर्जयति, धनेन धर्मम् आचरति, धर्मस्य आचरणेन जनः सुखं प्राप्नोति, अतः विद्या अवश्यमेव सुखं ददाति ।

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।7।।

भावार्थः - श्रीरामः लक्ष्मणं कथयति यत् हे लक्ष्मण ! यद्यपि लङ्का स्वर्णमयी अस्ति तथापि लङ्कायां निवासः न मह्यं रोचते, यतः जननी जन्मभूमिः च इति द्वयं स्वर्गात् अपि श्रेष्ठम् अस्ति। अतः मातृभूमौ निवासः उचितः ।

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।8।।

भावार्थः - आलस्यं मनुष्याणां शरीरे स्थितः महान् शत्रुः अस्ति। यतो हि आलस्यस्य कारणात् कार्यं न सिद्ध्यति। एवमेव परिश्रमेण समानः बन्धुः अपि नास्ति यतो हि परिश्रमं कृत्वा कोऽपि दुःखं न आप्नोति ।

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥9।।

भावार्थः - वृक्षाः स्वयं सूर्यस्य आतपे तिष्ठन्ति किन्तु अन्येषां प्राणिनां कृते छायां कुर्वन्ति, फलानि अपि स्वयं न खादन्ति अपि तु अन्येभ्यः एव यच्छन्ति । अतः ते सत्पुरुषाः इव सन्ति । यतः ये सज्जनाः भवन्ति, ते स्वयं कष्टानि सहित्वा अपि अन्येषां हितं कुर्वन्ति ।

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥10।।

भावार्थः - वृक्षस्य फलानि अन्ये खादन्ति, न तु वृक्षः स्वयं खादति। नदीनां जलस्य उपयोगम् अपि अन्ये एव प्राणिनः कुर्वन्ति। गावः अपि अन्येषां कृते एव दुग्धं यच्छन्ति। एवमेव अस्माकं जीवनम् अपि अन्येषाम् उपकाराय भवतु ।

## 2. **शब्दरुपाणि**

अकारान्त पुल्लिङ्ग शब्दः (बालक)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पंचमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधन | हे बालक! | हे बालकौ! | हे बालकाः! |

## आकारान्त स्त्रीलिङ्ग शब्दः (रमा)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पंचमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधन | हे रमे! | हे रमे! | हे रमाः! |

## अकारान्त नपुंसकलिङ्ग शब्दः (फल)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधन | हे फलम् ! | हे फले ! | हे फलानि ! |

## सर्वनाम शब्द (तत् पुल्लिङ्ग)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | स: | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तै: |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्य: |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्य: |
| षष्ठी | तस्य | तयो: | तेषाम् |
| सप्तमी | तस्मिन् | तयो: | तेषु |

सर्वनाम शब्द (तत् स्त्रीलिङ्ग)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | सा | ते | ता: |
| द्वितीया | ताम् | ते | ता: |
| तृतीया | तया | ताभ्याम् | ताभि: |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्य: |
| पञ्चमी | तस्या: | ताभ्याम् | ताभ्य: |
| षष्ठी | तस्या: | तयो: | तासाम् |
| सप्तमी | तस्याम् | तयो: | तासु |

- तत् शब्द के नपुंसकलिङ्ग के रूप में प्रथमा और द्वितीया में तत् ते तानि बनता है, शेष तृतीया से सप्तमी पर्यंत पुल्लिङ्ग के समान चलता है | सर्वनाम शब्दों में सम्बोधन नहीं होता है |

सर्वनाम शब्द (किम् पुल्लिङ्ग)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पंचमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

सर्वनाम शब्द (किम् स्त्रीलिङ्ग)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पंचमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

किम् शब्द के नपुंसकलिङ्ग के रूप में प्रथमा और द्वितीया में किम् के कानि बनता है, शेष तृतीया से सप्तमी पर्यंत पुल्लिङ्ग के समान चलता है |

## 3. धातुरुपाणि (पठ्,गम्,दृश्)

### लट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठति | पठतः | पठन्ति |
| मध्यम पुरुष | पठसि | पठथः | पठथ |
| उत्तम पुरुष | पठामि | पठावः | पठामः |

### लृट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यम पुरुष | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तम पुरुष | पठिष्यामि | पठिष्यावः | पठिष्यामः |

### लङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अपठत् | अपठताम् | अपठन् |
| मध्यम पुरुष | अपठः | अपठतम् | अपठत |
| उत्तम पुरुष | अपठम् | अपठाव | अपठाम |

## गम् धातु रूप

### लट् लकार (वर्तमान काल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम | गच्छति | गच्छतः | गच्छन्ति |
| मध्यम | गच्छसि | गच्छथः | गच्छथ |
| उत्तम | गच्छामि | गच्छावः | गच्छामः |

### लङ् लकार (भूतकाल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यम | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तम | अगच्छम् | अगच्छाव | अगच्छाम |

### लृट् लकार (भविष्यत्काल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यम | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तम | गमिष्यामि | गमिष्यावः | गमिष्यामः |

| लट् लकार (वर्तमान काल) | | | |
|---|---|---|---|
| **पुरुष** | **एकवचन** | **द्विवचन** | **बहुवचन** |
| प्रथम पुरुष | पश्यति | पश्यतः | पश्यन्ति |
| मध्यम पुरुष | पश्यसि | पश्यथः | पश्यथ |
| उत्तम पुरुष | पश्यामि | पश्यावः | पश्यामः |

| लङ् लकार (भूतकाल) | | | |
|---|---|---|---|
| **पुरुष** | **एकवचन** | **द्विवचन** | **बहुवचन** |
| प्रथम पुरुष | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यम पुरुष | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तम पुरुष | अपश्यम् | अपश्याव | अपश्याम |

| लृट् लकार (भविष्यत् काल) | | | |
|---|---|---|---|
| **पुरुष** | **एकवचन** | **द्विवचन** | **बहुवचन** |
| प्रथम पुरुष | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यम पुरुष | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तम पुरुष | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

## 4. संख्याः

### वयं संख्यां गणयामः (१ – ५०)

| | | | | |
|---|---|---|---|---|
| १ – एकम् | ११ – एकादश | २१ – एकविंशतिः | ३१ – एकत्रिंशत् | ४१ – एकचत्वारिंशत् |
| २ – द्वे | १२ – द्वादश | २२ – द्वाविंशतिः | ३२ – द्वात्रिंशत् | ४२ – द्विचत्वारिंशत् |
| ३ – त्रीणि | १३ – त्रयोदश | २३ – त्रयोविंशतिः | ३३ – त्रयस्त्रिंशत् | ४३ – त्रिचत्वारिंशत् |
| ४ – चत्वारि | १४ – चतुर्दश | २४ – चतुर्विंशतिः | ३४ – चतुस्त्रिंशत् | ४४ – चतुश्चत्वारिंशत् |
| ५ – पञ्च | १५ – पञ्चदश | २५ – पञ्चविंशतिः | ३५ – पञ्चत्रिंशत् | ४५ – पञ्चचत्वारिंशत् |
| ६ – षट् | १६ – षोडश | २६ – षड्विंशतिः | ३६ – षट्त्रिंशत् | ४६ – षट्चत्वारिंशत् |
| ७ – सप्त | १७ – सप्तदश | २७ – सप्तविंशतिः | ३७ – सप्तत्रिंशत् | ४७ – सप्तचत्वारिंशत् |
| ८ – अष्ट | १८ – अष्टादश | २८ – अष्टाविंशतिः | ३८ – अष्टात्रिंशत् | ४८ – अष्टचत्वारिंशत् |
| ९ – नव | १९ – नवदश | २९ – नवविंशतिः | ३९ – नवत्रिंशत् | ४९ – नवचत्वारिंशत् |
| १० – दश | २० – विंशतिः | ३० – त्रिंशत् | ४० – चत्वारिंशत् | ५० – पञ्चाशत् |

## संख्याप्रसिद्धिः

एकम् – एकं ब्रह्म

द्वे – द्वे अयने (उत्तरायणम्, दक्षिणायनम्)

त्रीणि – त्रीणि वचनानि (एकवचनम्, द्विवचनम्, बहुवचनम्)

चत्वारि – चत्वारि युगानि (कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगम्)

पञ्च – पञ्च अङ्गानि (तिथिः, वासरः, नक्षत्रम्, योगः, करणम्)

षट् – षट् रसाः (मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः)

सप्त – सप्त ऋषयः (मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः)

अष्ट – अष्ट दिक्पालाः ( इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः)

नव – नवग्रहाः (सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः)

दश – दश दिशाः (पूर्वदिशा, पश्चिमदिशा, उत्तरदिशा, दक्षिणदिशा, आग्नेयकोणः, नैर्ऋत्यकोणः, वायव्यकोणः, ईशानकोणः, ऊर्ध्वम्, अधः)

## 5. समयः



# 6. फल-पुष्प-पक्षी-अङ्गानाम् नामानि






पाटलम्



गन्धपुष्पम्



सूर्यकान्तिः



कमलम्



चम्पकः



कर्णोरः



अपराजिता



जपाकुसुमम्



मल्लिका

© NCERT not to be republished

| क्रम. | हिंदी नाम | संस्कृत नाम | क्रम. | हिंदी नाम | संस्कृत नाम |
|---|---|---|---|---|---|
| 1 | कबूतर | कपोतः | 11 | बत्तख | वारिहंसः |
| 2 | कौआ | काकः | 12 | मुर्गा | कुक्कुटः |
| 3 | तोता | शुकः | 13 | मुर्गी | कुक्कुटी |
| 4 | मोर | मयूरः | 14 | गिद्ध | गृध्रः |
| 5 | हंस | हंसः | 15 | सारस | सारसः |
| 6 | उल्लू | उलूकः | 16 | बगुला | बकः |
| 7 | चिड़िया | चटकः / चटका | 17 | तीतर | तित्तिरिः |
| 8 | बाज | श्येनः | 18 | मैना | सारिका |
| 9 | गरुड़ | गरुडः | 19 | पपीहा | चातकः |
| 10 | कोयल | कोकिलः | 20 | बुलबुल | कलविङ्कः |



## 7. वाक्यरचना

1. संस्कृत में तीन पुरुष होते हैं – i. प्रथम पुरुष या अन्य पुरुष ii. मध्यम पुरुष iii- उत्तम पुरुष
2. संस्कृत म्रें तीन वचन होते हैं – i. एकवचन ii. द्विवचन iii. बहुवचन
3. संस्कृत में तीन लिंग होते हैं – i. पुल्लिंग ii. स्त्रीलिंग iii. नपुंसकलिंग
4. अनुवाद करते समय सबसे पहले हम वाक्य का कर्त्ता पहचानना चाहिये| क्रिया से 'कौन' लगा कर प्रश्न करने से जो उत्तर मिलता है, वह कर्त्ता होता है| जैसे - रमेश खेलता है| यदि कहा जाय- कौन खेलता है? इसका उत्तर होगा - रमेश| अत: इस वाक्य मे रमेश कर्त्ता है|
5. कर्त्ता के अनुसार क्रिया का प्रयोग होता है| अर्थात यदि कर्ता एक वचन है तो उसकी क्रिया भी एकवचन तथा यदि कर्ता द्विवचन है तो उसकी क्रिया द्विवचन और यदि कर्ता बहुवचन हो तो क्रिया भी बहुवचन होती है|

6. प्राय: क्रियाओ के काल का बोध कराने के लिए 5 लकारो का प्रयोग होता है, जो निम्न हैं–

(i) लट्लकार- वर्तमान काल की क्रिया के लिए प्रयोग किया जाता है| जैसे- स: पठति |
(ii) लड्.लकार- भूतकाल काल की क्रिया के लिए प्रयोग किया जाता है| जैसे- स: अपठत् |
(iii) लृट् लकार- भविष्यत् काल की क्रिया के लिए प्रयोग किया जाता है| जैसे- स: पठिष्यति |
(iv) लोट् लकार- आज्ञा देने या प्रार्थना करने की क्रिया के लिए प्रयोग किया जाता है|
जैसे- त्वं पठ|
(v) विधिलिंग लकार– चाहिये या उपदेश आदि की क्रिया के लिए प्रयोग किया जाता है| जैसे- स: पठेत्|

7. कर्त्ता और क्रिया के पुरुष के वचन में समानता होती है| अर्थात् जिस पुरुष और जिस वचन में कर्त्ता होगा क्रिया भी उसी पुरुष और वचन में होगी | कर्त्ता के लिंग का क्रिया पर कोई प्रभाव नहीं पड़ता है |

8. युष्मद् (त्वं-तुम आदि) के लिए मध्यम पुरुष, अस्मद् (अहम्-मैं, हम आदि) के लिए उत्तम पुरुष, तथा शेष सभी प्रकार के कर्त्ता के लिए प्रथम पुरुष या अन्य पुरुष का प्रयोग होता है |

9. वर्तमान काल की प्रथमपुरुष की क्रिया में 'स्म' जोड़ देने से भूतकाल की क्रिया हो जाती है जैसे – स: पठति स्म = वह पढ़ा या उसने पढ़ा था|

**संस्कृत अनुवाद में सहायक तालिका**

[इस तालिका के माध्यम से वचन, पुरुष तथा क्रिया को अनुवाद करते समय प्रयोग विधि को समझाया गया है | इस तालिका का अवलोकन अवश्य करें]

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष(अन्य पुरुष ) | बालक: पठति ।<br>(लड़का पढ़ता है ।)<br>स: पठति।<br>(वह पढ़ता है ।) | बालकौ पठत: ।<br>(दो लड़के पढ़ते है ।)<br>तौ पठत: ।<br>( वे दोनो पठते है ।) | बालका: पठन्ति ।<br>(लड़के पढ़ते हैं ।)<br>ते पठन्ति ।<br>( वे सब पढ़ते हैं ।) |
| मध्यम पुरुष | त्वम् पठसि ।<br>( तुम पढ़ते हो ।) | युवाम् पठथ: ।<br>( तुम दोनों पढ़ते हो ।) | यूयम् पठथ ।<br>( तुम सब पढ़ते हो।) |
| उत्तम पुरुष | अहम् पठामि ।<br>(मैं पढ़ता है ।) | आवाम् पठाव:<br>( हम दोनों पढ़ते हैं ।) | वयम् पठाम: ।<br>( हम सब पढ़ते हैं ।) |

**स्पष्टीकरण –**

1. प्रथम पुरुष को अन्य पुरुष भी कहा जाता है। प्रथम पुरुष में युष्मद् शब्द के कर्त्ताओं तथा अस्मद् शब्द के कर्त्ताओं को छोड़ कर अन्य जितने भी कर्त्ता होते हैं, वे सब प्रथम पुरुष के अंतर्गत आते हैं ।जैसे- स:, राम:, बालक:, मोहन:, सीता, बालिका आदि ।
2. मध्यम पुरुष में केवल युष्मद् शब्द के तीन कर्त्ता (त्वम्, युवाम्, यूयम्) का प्रयोग होता है। इसके अतिरिक्त कोई अन्य कर्त्ता प्रयुक्त नहीं होता है ।
3. उत्तम पुरुष में केवल अस्मद् शब्द के तीन कर्त्ता (अहम्, आवाम्, वयम्) का प्रयोग होता है ।इसके अतिरिक्त कोई अन्य कर्त्ता प्रयुक्त नहीं होता है ।
4. प्रत्येक लकार के तीन पुरुष होते हैं तथा प्रत्येक पुरुष के तीन वचन होते हैं। इस प्रकार प्रत्येक धातु के नौ रुप होते हैं ।

पाँच लकारों के उदाहरण –

1. लट्लकार– रमा पाठं पठति ।
2. लड्.लकार- यूयम् अगच्छत ।
3. लृटलकार– ते पठिष्यन्ति ।
4. लोट्लकार– त्वं सत्यं वद ।
5. विधिलिंग – मानव: प्रतिदिनं ईश्वरं स्मरेत् ।

# 8. सामान्य वार्तालाप

**संस्कृतं वदतु** (संस्कृत बोलिये)

| | | |
|---|---|---|
| नमस्ते/नमस्कारः। | नमस्ते/नमस्कार। | Hello! |
| प्रणामः। | प्रणाम। | Good day! |
| धन्यवादः। | धन्यवाद। | Thank You! |
| स्वागतम्। | स्वागत। | Welcome |
| क्षम्यताम्। | क्षमा कीजिए। | Exuse me/Pardon me. |
| चिन्ता मास्तु। | कोई बात नहीं/जाने दो। | Don't worry |
| कृपया। | कृपया। | Please |
| पुनः मिलामः। | फिर मिलेंगे। | See you Later. |
| अस्तु। | ठीक है। जी हाँ। जी। | All right. |
| श्रीमन्/मान्यवर। | श्रीमान्/मान्यवर। | Sir! |
| मान्ये। | श्रीमती जी। | Madam! |
| उत्तमम्/शोभनम्। | अच्छा। | Very good! |
| बहु उत्तमम्। | बहुत अच्छा। | Excellent! |
| भवतः नाम किम् ? | आपका नाम क्या है? (पु०) | What is your name ? (for masculine) |

| | | |
|---|---|---|
| भवत्याः नाम किम्? | आपका नाम क्या है?(स्त्री०) | What is your name ? (for female) |
| मम नाम '........'। | मेरा नाम ' .......... '। | My name is ....... |
| एषः मम मित्रं '........'। | यह मेरा मित्र ' .......... '। | This is my friend ...... (for mas.) |
| एषा मम सखी '.......'। | यह मेरी सखी ' .......... '। | This is my friend ...... (for fem.) |
| भवान्/भवती कस्यां कक्षायां पठति ? | तुम किस कक्षा में पढ़ते हो ? | Which class are you studying in? |
| अहं पञ्चम-कक्षायां पठामि। | मैं पाँचवी कक्षा में पढ़ता हूँ। | I study in the 5th class. |
| भवतः ग्रामः/भवान् कुत्रत्यः? | आप कहाँ के रहने वाले हैं ? | Which city are you from ? |
| अहं भोयर ग्रामस्य निवासी अस्मि। | मैं भोयर ग्राम का निवासी हूँ। | I am resident of New York. |
| कुतः आगच्छति ? | आप कहाँ से आ रहे हैं ? | Where do you coming from ? |
| विद्यालयतः आगच्छामि | स्कूल से आ रहा/रही हूँ। | I am coming from school. |
| गृहतः आगच्छामि | घर से आ रहा/रही हूँ। | I am coming from home. |
| ...तः आगच्छामि | से। आ रहा/रही हूँ। | I am coming from ........ |

| | | |
|---|---|---|
| कुत्र गच्छति ? | आप कहाँ जा रहे हैं ? | Where are you going ? |
| देवालयं गच्छामि। | मन्दिर जा रहा हूँ। | I am going to temple. |
| (कार्यालयम्) गच्छामि। | (कार्यालय) जा रहा हूँ। | I am going to office. |
| स्वल्पम्। | जरा-सा/थोड़ा-बहुत। | a little |
| 'पञ्चवादने। | पाँच बजे। | At five O'clock. |
| अहं न जानामि। | मैं नहीं जानता हूँ। | I do not know. |
| किमर्थं न भवति ? | क्यों नहीं होता है? | Why does it not happen ? |
| अथ किम् ? | और क्या? | What else ? |
| नैव खलु। | नहीं तो। | No indeed! |
| आगच्छतु। | आइये/पधारिये। | Please come. |
| उपविशतु। | बैठिये। | Please be seated. |
| ज्ञातम् ? | समझे ? | Has it been understood ? |
| कथम् आसीत् ? | कैसा था/रहा ? | How was it ? |
| कार्यक्रमः कदा ? | कार्यक्रम कब है ? | When is the programme ? |
| अद्य एव किम् ? | क्या सिर्फ आज है ? | Is it today only ? |
| अद्य न, श्वः। | आज नहीं कल (आनेवाला)। | Not today, tomorrow. |
| तद् ह्यः एव समाप्तम्। | वह कल (बीता हुआ) | It was over yesterday |

| | | |
|---|---|---|
| इदानीम् एव ? | अभी ? | Is it only now ? |
| आम्, इदानीम् । | हाँ, अभी । | Yes, now! |
| प्राप्तं किम् ? | मिला क्या ? | Did you get it? |
| कस्मिन् समये ? | कितने बजे ? | At what time ? |
| पञ्चवादने । | पाँच बजे । | At five O'clock. |
| आवश्यकं न आसीत् । | नहीं चाहिये था । | It was not necessary. |
| महान् आनन्दः । | बहुत अच्छा । | A (matter of) great pleasure. |
| प्रयत्नं करोमि । | प्रयत्न करुँगा / करुँगी । | I am trying./I try. |
| न शक्यते भोः । | नहीं हो सकता । | Oh! It is not (at all) possible. |
| तथा न वदतु । | ऐसा मत कहिये । | Don't say so. |
| कदा ददाति ? | कब दोगे ? | When will you give ? |
| अहं किं करोमि ? | मैं क्या करुँ ? | What can I do ? |
| कति जनाः सन्ति ? | कितने लोग हैं ? | How many people are there? |

| | | |
|---|---|---|
| पुनः आगच्छतु । | फिर से आइये । | Please come again. |
| अवश्यम् आगच्छामि । | जरूर आऊँगा । | I will certainly come. |
| भवान् कथम् अस्ति ? | आप कैसे हैं ? | How are you (mas.) ? |
| गृहे सर्वं कुशलम्? | घर में सब कुशल हैं? | Is everything well at home ? |
| आम्, सर्वं कुशलम् । | जी हाँ, सब कुशल है । | Yes, everything is fine. |
| भवतः का वार्ता ? | आपका क्या समाचार है? | What is the news about you? |
| भवान् एव श्रावयतु । | आप ही सुनाइये । | You alone say. |
| किं मेलनं/बहु विरलं जातम् ? | क्या बात है? कम मिलते हैं ? | What's the matter, we/they meet so rarely ? |
| आगच्छतु, उपविशतु । | आइये, बैठिये । | Please come. Have a seat. |
| जलम् आनयामि ? | पानी लाऊँ ? | Should I bring water ? |
| मास्तु/नैव । | नहीं । | No, please. |
| कथम् आगमनम् अभवत् ? | कैसे आना हुआ ? | What prompted you to come? |
| मार्गः विस्मृतः किम् ? | रास्ता भूल गये क्या ? | Has the way been forgotten? |

| | | |
|---|---|---|
| अहं संस्कृतेन सम्भाषणं करोमि । | मैं संस्कृत में वार्तालाप करता हूँ। | I converse in Samskrit. |
| सम्भाषणेन भाषाभ्यासः शीघ्रं भवति । | सम्भाषण से भाषा का अभ्यास शीघ्र होता है। | Conversation makes knowledge language faster. |
| संस्कृतं भारतस्य सांस्कृतिकभाषा । | संस्कृत भारत की सांस्कृतिक भाषा है। | Samskrit is the cultural language of India. |
| संस्कृतभाषा जाति-मत-प्रदेशभेदेन विना सर्वेषां भाषा । | संस्कृत भाषा जाति-मत-प्रदेश के बिना सबकी भाषा है। | Samskrit is the language of all irrespective of the differeneces of castes, creeds, regions. |
| संस्कृतं सामाजिक-समरसतायाः साधनम् । | संस्कृत सामाजिक समरसता का साधन है। | Samskrit is the instrument of social integrity. |
| संस्कृतं संस्कृतमाध्यमेन पाठनीयम् । | संस्कृत संस्कृत के माध्यम से ही पढ़ानी चाहिए। | Samskrit should be taught though Samskrit medium. |
| संस्कृतभाषा पुनरपि व्यवहारभाषा जाता । | संस्कृत भाषा फिर से व्यवहारभाषा हो गयी। | Samskrit has once again become the language of daily usage. |

| शुभाशयाः (शुभकामनाएँ) | | (Good Wishes) |
|---|---|---|
| नववर्षस्य शुभाशयाः। | नये वर्ष की शुभकामनाएँ। | Happy New Year! |
| नववर्षं नवोत्साहं ददातु। | नया वर्ष नया उत्साह प्रदान करे। | Let the new year bring new hopes. |
| नववर्षं नवहर्षम् आनयतु। | नया वर्ष नवीन हर्ष लाए। | Let the new year bring new joy. |
| युगादि शुभाशयाः। | युगादि शुभकामनाएँ। | Good wishes for Yugadi. |
| दीपावली-शुभाशयाः। | दीपावली शुभकामनाएँ। | Good wishes for Diwali (the festival of lights) |
| वैवाहिकजीवनं शुभं भवतु। | वैवाहिक जीवन शुभकारी हो। | Wish you a very happy married life |
| सफलतायै अभिनन्दनम्। | सफलता के लिए बधाईयाँ। | Congratulations for the success. |
| कार्यक्रमः यशस्वी भवतु। | कार्यक्रम यशस्वी हो। | May the function be successful. |